लोहितार्णः सुधामा च भ्राजिष्ठश्चापि सप्तमः ।
गिरयश्चापि सप्तैव वर्षसीमाकरा द्विज ! ।
शुक्लोऽथ वर्द्धमानश्च भोजन उपबर्हणः ॥
नन्दनो नन्दनश्चैव सर्व्वतोभद्र इत्यपि ।
सप्त तत्र महानद्यः पावना ब्राह्मणर्षभ ! ॥
अभया चामृतौघा च ह्यभिरूपवती तथा ।
तीर्थवत्यार्य्यका शुक्ला पवित्रवत्यपि स्मृता ॥
विप्रादयस्तथा वर्णाः ख्याता नामान्तरेण तु ।
पुरुषः प्रथमो वर्णो द्वितीयो ऋषभः स्मृतः ॥
तृतीयो द्रविणो नाम देवसंज्ञश्चतुर्थकः ।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च ॥*॥
एवं परस्तात् क्षीरोदात् शाकद्वीपो द्विजर्षभ ! ।
आयामेन स विज्ञेयो द्वात्रिंशल्लक्षयोजनः ॥
दधिमण्डोदकेनैव समानेन स सिन्धुना ।
परीतो भाति तत्रास्ति शाको नाम महीरुहः ॥
द्वीपख्यातिकरः श्रीमान् वासयन् द्वीपमेव तम् ।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ ॥
धूम्रानीको वेपमानो विश्वाधारश्च मारिष ! ।
बहुरूपचित्ररेफो गिरयोऽपि च सप्त वै ॥
ईशान उरुशृङ्गश्च बलभद्रो महानसः ।
शतकेशरनामा च सहस्रस्रोत एव च ।
देवपालोऽपि सप्तैते वर्षसीमप्रवर्त्तकाः ।
नद्यः सप्तैव विख्याता आयुर्दाश्चानघा द्विज ! ॥
सहस्रस्रुतिः पञ्चनदी निर्ज्जितरपराजिता ।
विख्यातोभयस्पृष्टिश्च महापुण्या महाफलाः ॥
विप्रादयस्तथा वर्णा ख्याता नामान्तरेण तु ।
आद्यो ऋतव्रतो नाम ततः सत्यव्रतः स्मृतः ॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः ।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च ॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान् ।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु ॥
परिवीतः समानेन सिन्धुना ब्राह्मणर्षभ ! ।
यत्र पुष्करमतुलं ज्वलज्ज्वलनसन्निभम् ॥
द्वीपख्यातिकरं पत्रसहस्रायुतशोभितम् ।
यदाहुरासनं विश्वस्रष्टुस्तस्य प्रजापतेः ॥
द्वीपमध्येऽवधिगिरिरेक एव महामते ! ।
स मानसोत्तरो नाम प्राकार इव वेष्टकः ॥
तस्य पूर्व्वापरौ पार्श्वौ देवर्षे ! तत्र मारिष ! ।
सिन्धोर्वेष्टनमन्येकं गिरेर्वेष्टनकं परम् ॥
रमणकं धातकञ्च द्वे वर्षे नामतः स्मृते ।
मानं तस्य गिरेर्विप्रायुतयोजनमुच्छ्रितम् ॥
तावदेव तथायामस्तस्योपरि पुराणि च ।
चत्वारि लोकपालानामिन्द्रादीनां द्विजर्षभ ! ॥
यः परिक्रममाणस्य मेरुं विप्र ! विवस्वतः ।
मह्नां बिभर्त्ति शैवेन्द्रचक्रं सम्वत्सरात्मकम् ॥
अध्यासते च द्वौ पार्श्वौ प्रजास्तस्य महाबलाः ।
तत्र संज्ञान्तरं नास्ति वर्णानां ब्राह्मणर्षभ ! ॥
स्वादूदकस्य परतो लोकालोकाचलो महान् ।
लोकस्य चाप्यलोकस्य मध्ये गिरिवरः स्थितः ॥
प्राकार इव संवेष्ट्य लोकान् सर्व्वान्महामते ! ।
लोकालोकाचलो नाम तेनासौ परिकीर्त्तितः ॥
मानसोत्तरमेर्व्वोस्तु अन्तरे यावती मही ।
तावती काञ्चनी भूमिर्लोकालोकात् परे द्विज ! ॥
यत्र प्रक्षिप्तं वस्तु कथञ्चिन्नोपलभ्यते ।
सौवर्णी कान्तिसन्दीप्ता सर्व्वसत्त्वप्रमाथिनी ।
अतः सर्व्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि ।
लोकालोको गिरिर्यस्तु लोकान्ते वर्त्तते महान् ॥
आवृणोति स तेजांसि सूर्य्यादीनामपि द्विज ! ।
समतिक्रम्य ज्योतींषि क्षमन्ते न प्रवर्त्तितुम् ॥
तावदुन्नाहवान् ब्रह्मन्नायामेन च तादृशः ।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना ॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः ।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः ॥
नियुक्ता ब्रह्मणा भूमिं करैराहृत्य संस्थिताः ।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः ॥
पार्षदप्रवरैर्ब्रह्मन् ! शुभैर्बहुभिरच्छुतैः ।
धारयन् जगतीमास्ते आकल्पमपि मारिष ! ॥
योऽन्तर्विस्तार एतस्या भूम्यास्ते परिवर्णितः ।
तावती भूरलोकाख्या सान्द्रसन्तमसावृता ॥
ततो योगेश्वरगतिर्योगिनां प्राप्यमुत्तमम् ।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते ॥
इति ते कथितं ब्रह्मन् ! भूगोलस्योपवर्णनम् ॥

व्यास उवाच ।

य इदं शृणुयात् सूत ! भूगोलस्यानुवर्णनम् ।
प्रदक्षिणीकृता तेन सशैलवनकानना ।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा ॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम १११ अध्यायः ॥*॥ ज्योतिषशास्त्रोक्तभूगोलम् ॥ यथा,—

"सिद्धिं साध्यमुपैति यत्स्मरणतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदाश्लक्ष्णललितं लालित्यलीलावती ।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे ॥"

गोलग्रन्थकथने कारणमाह ।

'मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम् ।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः ॥'

अथ गोलप्रशंसया गोलानभिज्ञगणकोपहासमाह ।

'भोज्यं यथा सर्व्वरसं विनाज्यं
राज्यं यथा राजविवर्ज्जितञ्च ।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथैव ॥
वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्मयात् पटुबटुभ्रूभङ्गवक्रोक्तिभिः ।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्व्वित् सदसि प्रगल्भगणकप्रश्नप्रपञ्चोक्तिभिः ॥'

अथ गोलस्वरूपमाह ।

'दृष्टान्त एवावनिभग्रहाणां
संस्थानमानप्रतिपादनार्थम् ।
गोलः स्मृतः क्षेत्रविशेष एव
प्राज्ञैरतः स्याद्गणितेन गम्यः ॥'

अथ गणितप्रशंसामाह ।

'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ॥'

अथ ज्योतिषशास्त्रस्याधिकारिलक्षणमाह ।

'द्विविधगणितमुक्तं व्यक्तमव्यक्तसंज्ञं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः ।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी ॥'

व्याकरणवर्णनमाह ।

'यो वेद वेदवदनं सदनं हि सम्यग्-
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥'

अथ गोलग्रन्थस्य प्रशस्तार्थमन्योक्तप्रकारेणाह ।

'गोलं श्रोतुं तव यदि मतिर्भास्करीयं शृणु त्वं
नो संक्षिप्तो न च बहु वृथा विस्तरः शास्त्रतत्त्वम् ।
लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्मा-
दिद्वन् ! विद्वत्सदसि पठतां पण्डितोक्तिं व्यनक्ति ॥'

अथ भूसंस्थानं प्रश्नश्लोकद्वयेन आह ।

'भ्रमद्भचक्रचक्रान्तर्गगने गगनेचरैः ।
वृता धृता धरा केन येन नेयमियादधः ॥
किमाकारा कियन्माना नानाशास्त्रविचारणात् ।
कीदृग्द्वीपकुलाद्रीन्द्रसमुद्रैर्मुद्रितोच्यताम् ॥'

अथ ग्रहस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह ।

'संक्षिप्तो द्युगणाद्युगादिभगणैः खेटोऽनुपातेन यः
स्यात्तस्यास्फुटता कथं कथमभूत् सद्दृक्कृतिर्नैकधा ।
किं देशान्तरमुन्नमान्तरमहो बाह्वन्तरं किञ्चरं
किञ्चोच्चं चञ्चलञ्च तदिदं कस्तात ! पातः स्मृतः ॥
किं केन्द्रं किमु केन्द्रजं किमु चलं किम्बा चलं तत्फलं
कस्मात्तत्सहितः कृतश्च रहितः खेटस्फुटो जायते ।